# ज्योतिषशास्त्रानुसारं शुभाशुभशकुनचिन्तनम्

**कपिलदेवसुवेदी**

*उपप्राध्यापकः, विश्वविद्यालयविद्यापीठम्, दाङ्गः*

kdsubedi034@gmail.com

**शोधसारः**

*स्कन्धत्रयाधिष्ठितं ज्योतिषशास्त्रमाधृत्य लेखोऽयं निबद्धोऽस्ति । संहितास्कन्धान्तर्गतं शकुनशास्त्रं कीदृशम् ? तस्य लोकव्यवहारे प्रभावश्च कः ? इत्यादयो विषया आलेखेऽस्मिन् विवेचिताः सन्ति । प्राचीनकालादेवाङ्गीकृतं शकुनविज्ञानं सम्प्रत्यपि तावदेव विश्वासावहं सर्वजनस्वीकार्यञ्च विद्यते । केचन वैज्ञानिकम्मन्यास्तत्र विश्वासभाजना न भवेयुः परं स्वस्वरीत्यनुसारम् सर्वेऽपि मानवाः शकुनं विश्वसन्ति । भारतीयानां शकुनज्ञानपद्धतिः एकविधास्ति चेत् अन्येषामपरा भवेत् परन्तु अन्यनाम्ना अन्यप्रणाल्या वा अपरेषामपि शकुनरीतिः प्रचलितास्त्येव । स्वसंस्कृतिपरम्परानुसारम् शकुनव्यवस्था, तत्तत्समुदायेऽस्ति रूढा । अस्माकं भारतीयानां कृते गोदर्शनम्, शुभशकुनमस्ति चेत् केषाञ्चित् शूकरदर्शनं शुभशकुनं स्यात् । परन्तु शकुनविज्ञानन्तु सर्वेऽपि स्वीकुर्वन्त्येव । शकुनमपि बहुविधं प्रतिपादितम् । आलेखेऽस्मिन् सामान्यतया प्रचलितानि शकुनानि एव प्रतिपादितानि । तत्र पशुशकुनम्, पक्षिशकुनम्, मानसिकशकुनम्, स्वप्नशकुनम्, अङ्गस्फुरणशकुनमित्यादिशकुनानि प्रमुखानि सन्ति । विशेषतः यात्रारम्भे युद्धसमये मृत्यसमये च शकुनं महत्त्वपूर्णं भवति । सर्वेषां मनसि विषयेऽस्मिन् जिज्ञासा जायते शकुनद्वारा पूर्वमेव परिणामावबोधार्थं प्रभवन्ति जनाः । एतेषां शकुनज्ञानं चतुर्भिः प्रकारैः कर्तुं शक्यते । पश्वादिभिः, मनोवृत्तिभिः, स्वप्नमाध्यमेन, तथा अङ्गस्फुरणादिना च । तत्तत्प्रकारैः ज्ञानं शकुनं कदाचिदपि न व्यभिचरति । अनेन चराचरं प्रकृत्यात्मकं जगत् मानवहिताय सर्वजनकल्याणाय च प्रयतमानं दरीदृश्यते । प्रकृतिः जडरूपेति वदतां वचसि अनृतत्वं समायाति । न हि प्रकृतिः जडरूपा । सा तु सचेतना सती शुभाशुभशकुनमाध्यमेन सर्वेभ्यो हितमुपदिशति । 'शकुनं च बृहस्पतिः ।' इति कथनानुसारं शकुनशास्त्रं मानवानां कृते व्यावहारिकदृष्ट्या शास्त्रीयदृष्ट्या च महदुपकारकमस्तीति सोहापोहं सप्रमाणं च प्रतिपादितमस्त्यत्र ।*

**विशेषशब्दाः**

दैवज्ञः, शपथः, असृग्, दिक्शूलम्, कालराहुः ।

**विषयपरिचयः**

वेदाङ्गेषु ज्योतिषस्य महत्त्वपूर्णं स्थानं वरीवर्ति । महर्षिणा पाणिनिना च वेदस्य चक्षुःस्थानीयाङ्गत्वेन ज्योतिषशास्त्रमङ्गीकृतम् '*ज्योतिषामयनं चक्षुः* (अधिकारी, वि.सं. २०७६, पृ. ३०)' इति । यथा मनुष्याः चक्षुरिन्द्रियं विना दर्शनीयानि वस्तूनि द्रष्टुं नैव प्रभवन्ति, तथैव वेदादिशास्त्राण्यपि ज्योतिषशास्त्रं विना शुभशुभकर्माणि बोधयितुं नैवार्हन्ति । मानवसम्बद्धानां सर्वेषामपि पदार्थानां त्रैकालिकं ज्ञानं ज्योतिषशास्त्रमेव दिशति । वेदनिर्दिष्टाः यज्ञाश्च समुचितं

कालमपेक्षन्ते । समुचितकालश्च ज्योतिषादेव ज्ञायते । अतः ज्योतिषं विना लौकिकवैदिककर्मतन्त्रं निखिलमपि अन्धकारमयं जायत इति ज्योतिषशास्त्रं वेदाङ्गेषु मूर्धन्यं स्थानं भजते । वस्तुतः कालबोधकं शास्त्रमेव ज्योतिषशास्त्रम् । ज्योतिषशास्त्रस्य लोके वेदे च सर्वत्रोपादेयत्वेन च चर्चानुभूयते । मुण्डकोपनिषदि विद्यायाः परापरभेदेन द्वैविध्यं प्रतिपाद्य ज्योतिषस्य अपराविद्यान्तरगतत्वं निरूपितम् । यथाह – *'द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते '* (मु.उ. १/१/४-५) (गिरि, २०७३, पृ. ३२०) इति । *'लक्षं तु वेदाश्चत्वारः लक्षं भारतमेव च'* (चरणव्यूह ५/१) इति कथनानुसारं वेदे एकलक्षपरिमिता मन्त्राः सन्ति । तत्राशीतिसहस्राणां मन्त्राणां कर्मकाण्डे विनियोगो विद्यते । एतावता वेदे कर्मभागः प्रधानोऽस्ति । यज्ञविधानमेव वेदानां मुख्यं कर्म । यज्ञाश्च कालाधीनाः भवन्ति । केचन यज्ञाः संवत्सरसम्बद्धाः । केचन ऋतुमासपक्षसम्बद्धाश्च दृश्यन्ते । यथाह तैत्तिरीयब्राह्मणे- *'वसन्ते ब्राह्मणोऽग्निमादधीत । ग्रीष्मे राजन्य आदधीत । शरदि वैश्य आदधीत ।'* (तै.ब्रा. ४/५) इति । अत्र ऋतुसम्बद्धो यज्ञो निर्दिष्टः । एवमेव *'एकाष्टकायां वीक्षेरन् । फाल्गुनी पूर्णमासे वीक्षेरन् ।'* (ता.ब्रा. ५/९/१७) इति । अत्र माससम्बद्धयज्ञो व्याख्यातः । तथैव *'प्रातर्जुहोति । सायं जुहोति ।'* (तै. ब्रा. २/१/२) इत्यादिषु च कश्चिद्विशिष्टकालः यज्ञसम्बद्धत्वेनोपस्थापितः । अतः कालज्ञानं विना यज्ञसम्पादनमसम्भवम् । तस्मात्कालबोधकं शास्त्रं ज्योतिषम् वेदस्य चक्षुःस्थानीयं प्रधानमङ्गमस्ति । तदभावे यज्ञार्थं प्रवृत्तानां वेदानामपि गतिर्न दृश्यते । अतः ये ज्योतिषं जानन्ति, ते एव यज्ञविदो भवन्तीति नात्र कोऽपि सन्देशः (वेदाङ्गज्योतिषम्, ३) । भास्कराचार्येण ज्योतिषस्य वेदाङ्गत्वं सहजतयैव परिभाषितं परिलक्षते । उक्तं च सिद्धान्तशिरोमणौ –

*'वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञा प्रोक्तास्ते तु कालाश्रयेण ।*
*शास्त्राद्यस्मात् कालबोधो यतः स्यात्, वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ॥'*

(भास्कराचार्यः, सन् २०११, पृ. ५) इति ।

वेदस्य नित्यत्वात् तदङ्गीभूतज्योतिषस्यापि नित्यत्वमिति शक्यते परिकल्पयितुम् । परन्तु तत्प्रवर्तकरूपेण केचन आचार्याः परिगणिताः सन्ति । तत्र सूर्यादिशौनकान्तानामष्टादशानामाचार्याणां क्रमशः गणना विहितास्ति । अयं ज्योतिषसिद्धान्तः वासिष्टसिद्धान्तनाम्ना प्रसिद्धोऽस्ति । ज्योतिषसम्बद्धा अन्याः परम्पराः अपि प्राप्यन्ते । तदनुसारं सर्वप्रथमं सूर्यः मयनाम्नि पुरुषाय ज्योतिषविद्यां प्रोवाच । ततः जगति ख्यातिमगादिति । अयं सिद्धान्तः सूर्यसिद्धान्तनाम्ना प्रसिद्धोऽस्ति । पराशरमतानुसारं च स्वयं ब्रह्मा चतुर्भ्यः वेदेभ्यो ज्योतिषशास्त्रं निस्कास्य जगति विस्तारयामास इति । उक्तमपि *'वेदेभ्यश्च समुद्धृत्य ब्रह्मा प्रोवाच विस्तृतम् ।'* (बृहत्पा.हो.शा., उ. २१/३) इति । ब्राह्मणोपनिषत्पुराणेतिहासादिप्राचीनग्रन्थेषु ज्योतिषशास्त्रस्य वर्णनं प्राप्यते । अतोऽस्य शास्त्रस्य प्राचीनतायां न कोऽपि सन्देहः । तानेव ग्रन्थानाधृत्य जगति बहुभिराचार्यैः ज्योतिषसम्बद्धाः बहवो ग्रन्थाः सन्निबद्धाः । शास्त्रेऽस्मिन् त्रयः स्कन्धाः सन्ति । सिद्धान्तसंहिताहोरारूपेषु त्रिस्कन्धेषु समग्रमपि ज्योतिषवाङ्मयं निगूढं वेविद्यते । उक्तञ्च नारदेन *'सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम् । वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमनुत्तमम्'* (नारदसं. १/४) (शर्मा, १९८६, पृ. ५) इति । तत्र च सिद्धान्तस्कन्धैः त्रुट्यादिप्रलयान्तकालस्य गणना जायते । मूर्तामूर्तद्विविधकालस्य विवेचनं च क्रियते। एवमेव ब्राह्मदिव्यपित्र्यप्राजापत्यादिकालमानकथनमपि अत्रैव बोभवीति । गणितज्ञानं, खगोलभूगोलग्रहगोलादिज्ञानं, रेखाचापादिज्ञानं, त्रिकोणमितिज्ञानं, पञ्चाङ्गगणितज्ञानं, ग्रहोदयास्तादिस्पष्टीकरणज्ञानं, कालज्ञापकविविध-यन्त्रादिनिर्माणज्ञानम्, तथा ग्रहयुतिज्ञानञ्च सिद्धान्तस्कन्धादेव जायते । उक्तञ्च भास्करेण –

*'त्रुट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमात्'* इत्यादि (सि.शि.ग., ६)। संहितास्कन्धे च विषयान्तराणां ज्ञानं जायते। आचार्यवराहमिहिरेण स्वकीये बृहत्संहिताख्यग्रन्थे संहितास्कन्धान्तर्गता विषयाः विशेषेण विवेचिताः सन्ति । स्कन्धस्यास्यानुशीलनेन ग्रहसञ्चारज्ञानं भूकम्पोल्कापातादिज्ञानं, वायसशृगालादीनां रवाज्जायमानमिष्टानिष्टादिज्ञानम्, मृगाश्वगोगजकूर्मकुक्कुटादीनां चेष्टाज्ञानम्, तथा शुभाशुभशकुनज्ञानं च जायते । अतः स्कन्धस्यास्यापरं नाम व्यवहारशास्त्रं व्यवहारस्कन्धो वा इत्यपि समुल्लिखितं प्राप्यते। (ज्योतिषतत्त्वाङ्कः, २०१४, पृ. १८०) इति। एवमेव तृतीये होरास्कन्धे च जातकसम्बद्धाः विविधविषयाः विवेचिताः सन्ति। यस्मिन् स्कन्धे मुहूर्तशास्त्रं वास्तुशास्त्रं तथा जातकताजिकप्रश्नादिशास्त्रं च अन्तर्हितं जायते। स्कन्धोऽयं जातकस्कन्धनाम्नापि व्यवह्रियते। इत्थं त्रिभिः स्कन्धैः विस्तीर्णं ज्योतिषशास्त्रं लोके वेदे च महन्महत्त्वं बिभर्ति। वर्णितेषु त्रिषु स्कन्धेषु मध्ये शुभाशुभशकुनसम्बन्धिविषयाः संहितास्कन्धान्तर्गताः सन्ति। विशेषतयात्र तेषामेव विषयाणां विवेचनं चिन्तनं च जायते। विषयोऽयमतीव व्यावहारिको बहुजनोपयोगी च दृश्यते। ज्योतिषशास्त्रे शास्त्रान्तरे च शुभाशुभशकुनविषये कीदृशं चिन्तनं प्रस्तुतमिति सर्वेषां जनानां हृदि जिज्ञासा समुदेति। सम्प्रति तत्समाधानाय प्रयत्यते।

## अध्ययनस्य प्रमुखाः समस्याः

ज्योतिषशास्त्रसम्बद्धानि बहून्यध्ययनानि सन्ति सम्पन्नानि । ज्योतिषशास्त्रमधिकृत्य बहुभिरनुसन्धातृभिर्ज्योतिषशास्त्रस्वरूपम्, ज्योतिषशास्त्रसम्बद्धशकुनविज्ञानादिकं च लेखरचनादिमाध्यमेनाविष्कृतं विलोक्यते। ज्योतिषशास्त्रं सर्वेषां लौकिकवैदिककर्मसम्बद्धानां जनानां कृते महदुपकारकं, व्यावहारिकञ्च विद्यते। एतदर्थं शास्त्रमिदं सर्वैरवगन्तव्यमित्यध्ययनेऽस्मिन् विशेषतः सूत्ररूपेण समस्याद्वयं समायाति-

क) ज्योतिषस्य कः उपयोगः ?

ख) शुभाशुभशकुनस्वरूपं किम् ? इति।

## अध्ययनस्योद्देश्यम्

ज्योतिषशास्त्रमधिकृत्यासंख्यसंख्यावद्भिः स्वलेखनी व्यापारिता । ताभिर्लेखनीभिः सार्थकत्वमधिगता च । इदमप्यध्ययनं तदेव विषयजातमूरीकरोति विश्लेषयति च। तत्त्वरूपे वस्तुनि विकल्पाभावेऽपि तद्बोधयितुं यथा नानाविधा सरणिरवलम्ब्यते तथैव ज्योतिषशास्त्रावबोधाय सत्यामपि नानाविधायां पद्धत्यामध्ययनमिदं तत्रैव प्रवर्तते। सङ्क्षेपेण विचारित आलेखस्यास्य निम्नाङ्कितमुद्देश्यद्वयं दृश्येते -

क) ज्योतिषस्योपयोगित्वविवेचनम्।

ख) शुभाशुभशकुनविवेचनम्। इति।

## अध्ययनविधिः

लेखस्यास्य निष्पादनाय मुख्यसामग्रीः सङ्कलयितुं विशेषरूपेण पुस्तकालयीयाध्ययनविधिरेवात्राङ्गीकृतो विद्यते । ज्योतिषशास्त्रसम्बद्धानि ग्रन्थरत्नानि च लेखस्यास्य प्रमुखस्रोतांसि सन्ति । एवं ज्योतिषशास्त्रसम्मता व्याख्यानात्मकाः, टीकात्मकाः, समालोचनात्मकाः, विश्लेषणात्मकाश्चान्ये ग्रन्था आलेखाश्च द्वितीयसामग्रीत्वेनोररीकृता

विद्यन्ते । सोहापोहं ज्योतिषशास्त्रावबोधाय तत्प्रयोजनविश्लेषणाय च यथावसरं ग्रन्थान्तरावलोकन-विश्लेषणादिविधयश्चोपयुज्यन्ते । एवमेव यथावश्यकं तुलना-चिन्तन-मननादिविधयश्च प्रयोगविषयतामापद्यन्ते । क्वचिद् यथाकामं गभीरविषयचिन्तनविधौ स्वोपज्ञविधिश्चावलम्ब्यते ।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

सर्वप्रसिद्धं ज्योतिषशास्त्रमेवाध्ययनस्यास्य प्रमुखं क्षेत्रमस्ति । तच्छास्त्रमधिकृत्य तत्स्वरूपं तत्प्रयोजनञ्च सप्रमाणं निर्धार्यते । ज्योतिषशास्त्रान्तर्गतानि सर्वाण्यपि ज्योतिषस्य अङ्गोपाङ्गभूतानि ग्रन्थरत्नानि तत्रोद्घाटितानि तथ्यानि चात्र क्षेत्रान्तर्गतानि सन्ति । एवं तदतिरिक्ता विषयाश्च सीमारूपेण वर्तन्ते । एतावताध्ययनमिदं ज्योतिषशास्त्रसम्बद्धे क्षेत्रे पदं निदधातीति तस्य क्षेत्रत्वं तदतिरिक्तविषयेषु न प्रवर्तत इति तेषां सीमारूपत्वमध्ययनस्य सीमाङ्कनत्वं वा बोध्यम् ।

## ज्योतिषशास्त्रस्योपयोगित्वम्

वैदिकसनातनसंस्कृतिः श्रद्धाविश्वासावाश्रित्य अनादिकालात् समानरूपेण विराजते । श्रद्धाविश्वासयोरभावे लौकिकं वैदिकं वा कृत्यं किमप्यत्र न निष्पद्यते । अतः सर्वेषां हृदि कृत्याकृत्यकरणात् इष्टानिष्टप्राप्तिविषयिणी श्रद्धा समुद्भावनीयेति बहूनि शास्त्राणि तत्त्वविद्भिः विरचितानि प्रचारितानि च । तेषु ज्योतिषशास्त्रमप्यन्यतमं मन्यते । शास्त्रमिदं मासपक्षादिकालानुसारं मेषवृषादिराश्यनुसारं अश्विनीभरण्यादिनक्षत्रानुसारं प्रभवादिसंवत्सारानुसारं तथा मेषवृषादिलग्नानुसारं च जातकस्य भूतभविष्यादिकं दिशति । एवमेव युद्धादिविषये यात्रादिविषये तथा महोत्सवादिविषये च समुचितं कालं निर्धारयति । व्यवहारे प्रतिपदं शास्त्रस्यावश्यकत्वमनुभूयते । यज्ञमहोत्सवादिशुभकर्माणि शुभमुहूर्ते एव प्रारभ्यते सनातनसंस्कृत्यनुयायिभिः सर्वैः । शुभमुहूर्तस्य ज्ञानं च केवलं ज्योतिषशास्त्राधीनम् । सर्वस्यापि विशेषानुष्ठानस्य पूर्वं मुहूर्तादिज्ञानाय दैवज्ञः समाश्रयणीयः इति उल्लिखितं प्राप्यते । *'दैवज्ञं तु समाहूय मुहूर्तं पृछ्य यत्नतः ।'* (श्रीमद्भा. म. ६/२) (वेदव्यास, २०७५, पृ. २६) इत्यादिशास्त्रवचनान्यपि तदेव परिपोषयन्ति । शुभमुहूर्ते प्रारब्धा यात्रा फलोन्मुखा सेत्स्यति चेत् तदितरा निष्फला एव न शोकभयादिकष्टदापि भवितुमर्हति । अतः ज्योतिषस्य यात्राधिकरणे दिक्शूलादीनां वर्णनं प्राप्यते । वासरानुसारं दिक्शूलं निर्धारितमस्ति । शास्त्ररीत्यनुरूपं सोमशनिवासरयोः पूर्वदिशि रविशुक्रवासरयोः पश्चिमदिशि, गुरुवासरे दक्षिणदिशि तथा भौमबुधवासरयोश्च उत्तरदिशि दिक्शूलस्य स्थितिः निर्धारितास्ति । यस्मिन् यस्यां दिशिं दिक्शूलं निर्धारितम्, तस्मिन् दिने तत्र यात्रा निवारिता विद्यते । विहितायां च यात्रायां नामानुरूपं दिक्शूलं यात्रिणं घातयतीति लोकविश्वासः । यात्रां सफलयितुं योगिनीविचारोऽपि अत्यावश्यको मन्यते । योगिनी च तिथ्यनुसारं दिशमाश्रयति । प्रतिपदानवमीतिथ्योः पूर्वस्मिन्, षष्ठीचतुर्दशीतिथ्योः पश्चिमे, द्वितीयदशमीतिथ्योः उत्तरे, तथा पञ्चमीत्रयोदशीतिथ्योश्च दक्षिणे, योगिन्याः वासः निर्दिष्टः । यात्राकाले च गन्तुः योगिन्यां वामस्थायां सुखकरी, पृष्ठभागे स्थितायामभीष्टदायिनी, दक्षिणे स्थिता चेत् धनहारिणी, तथा सम्मुखा चेत् मृत्युदायिनी भवतीति सप्रमाणमुद्घोषितं प्राप्यते । उक्तञ्च –

*'योगनी सुखदा वामे पृष्ठे वाञ्छितदायिनी ।*
*दक्षिणे धनहन्त्री च सम्मुखे मरणप्रदा ॥' (ज्योतिषतत्त्वाङ्कः, २०१४, पृ. १७२) ।*

यात्रायां कालराहुरपि विचारणार्हः इति तत्तत्प्रकरणादिषु प्रतिपादितं प्राप्यते। कालराहुरपि वासरानुसारं निवसति। शनिश्चरवासरे पूर्वस्यां दिशि, भौमवासरे पश्चिमायां दिशि, गुरुवासरे दक्षिणस्यां दिशि, तथा रविवासरे च उत्तरस्यां दिशि कालराहुर्निवसति। तस्मिन् दिने तत्र यात्रा वर्जिता। योगिनी-दिक्शूल-कालराहु-आदीनां अनुकूलतायामेव यात्रा प्रशस्ता। कदाचिदेतेषां प्रतिकूलतायामपि यात्रानिवार्या चेत् पक्षान्तरं स्वीकृत्य समाधानं विधेयम्। *'हरति सकलदोषं चन्द्रमाः सम्मुखस्थः।'* इति सूक्त्यनुसारं चन्द्रदिग्ज्ञानं विधाय यात्रा कर्तव्या। पुनः चन्द्रदिग्ज्ञानं कथमिति चेत्, शास्त्रेषु स्पष्टयोक्तम्– *'मेषे च सिंहे धनुपूर्वभागे।'* (ज्योतिःसारशिरोमणिः) अत्र राश्यनुसारं चन्द्रमसो दिशा निर्धारिता विद्यते। मेषसिंहधनुषु पूर्वस्यां, वृषकन्यामकरेषु दक्षिणायां, मिथुनतुलाकुम्भेषु पश्चिमायाम्, तथा कर्कवृश्चिकमीनेषु च उत्तरस्यां दिशि चन्द्रमा राजते। तद्विचार्य यात्रारम्भो विधेयः। फलं च निर्दिष्टमस्ति यत्- चन्द्रमसि सम्मुखे अर्थलाभः, दक्षिणे सुखसम्पदः, पृष्ठे मरणम्, तथा वामे चन्द्रे च धनक्षयो जायते। अतः सर्वं दिक्शूलयोगिनीकालराहुचन्द्रादिकं विचार्य एव यात्रा कर्तव्या इति शास्त्रस्यास्याशयः। एतत्सर्वं व्यावहारिकं ज्ञानं ज्योतिषशास्त्रादेव जायते। ज्योतिषं न केवलं शास्त्रं अपितु एतद् विज्ञानमपि अस्ति। आकाशस्थानां ज्योतिर्मयपिण्डानां स्थितिमितिगतिसम्बद्धविषयाणामध्ययनं शास्त्रमिदं करोति। जगदिदं पाञ्चभौतिकमस्ति। सर्वे ग्रहाश्च तत्सम्बद्धा एव विद्यन्ते। अतः सूर्यादिग्रहेषु पृथ्वीजलतेजोवाय्वाकाशरूपपञ्चमहाभूतानां क्वचित्कस्यचिद्बाहुल्यं क्वचिच्च कस्यचित् बाहुल्यं दृश्यते। मनुजस्य जन्मसमये ग्रहचक्रे यस्य ग्रहस्य प्राबल्यं जातकस्य तस्य जीवनेऽपि तस्यैव ग्रहस्य प्राधान्यं जायते। आचार्यस्य वराहमिहिरस्य कथनानुसारं तु जातकस्य आकृतिदर्शनानन्तरमेव तस्मिन् कस्य ग्रहस्य प्रभावोऽस्तीति सहसा विनिश्चेतुं शक्यते। ग्रहाणां प्रभावः मनुष्येषु कथं जायत इति पुराणधर्मशास्त्राद्यवलोकनेनापि अनुमीयते। वाल्मीकिरामायणे रामराज्याभिषेके प्रवृत्तो दशरथो निजिजन्मनक्षत्रस्थान् सूर्यमङ्गलराहुग्रहान् मीमांसमानो घोरां विपत्तिमाशंकते। रामं सम्बोध्यं संशति च –

*अवष्टब्धं च मे राम, नक्षत्रं दारुणग्रहैः।*
*आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः।* (वा.रा. २/४/१८)(महर्षिवाल्मीकिः, २०४०, पृ. १७०) इति।

मनुरपि आकारेङ्गितगतिभिः जनानां हृद्भावमवगन्तुं शक्यत इति ग्रहप्रभावं पुरस्कृत्य सूचयति (मनु.स्मृ., ८/२६)। ग्रहा अपि सत्त्वरजस्तमोगुणेषु विभक्ताः सन्ति। केचन सात्त्विकाः केचन राजसास्तथा केचन ग्रहाश्च तामसा भवन्ति। उक्तञ्च- *चन्द्रार्कजीवाज्ञसितौ कुजार्कीं, यथाक्रमं सत्त्वरजस्तमांसि।* (ज्योतिषतत्त्वाङ्कः, सन् २०१४, पृ. १६७) इति। अनेन कथनेन सूर्यश्चन्द्रस्तथा बृहस्पतिश्च सत्त्वगुणी, बुधस्तथा शुक्रश्च रजोगुणी एवं मङ्गलस्तथा शनिश्च तमोगुणी विद्यते। जातकस्य जन्मसमये यो ग्रह बलवान् जातको जीवनावधि तद्गुणविशिष्ट एव जायत इति ज्यौतिषः सिद्धान्तः। अनया रीत्या अस्माकं जीवने ग्रहाणां प्रभावो बोभवीति तद्बोधकशास्त्राध्ययनं नितरामावश्यकम्। नित्यनैमित्तिकादिकर्मव्यवहारे तथा दैनिकव्यवहारे च शास्त्रमिदं महदुपकारकम्। एवं ज्योतिषविद्या अर्थकरी च मन्यते। वस्तुतः शास्त्रस्यास्य सेवनेन धर्मार्थकाममोक्षाख्याः चत्वारः पुरुषार्थाः एव क्रमशोऽधिगताः भवन्ति। भास्कराचार्येण तूक्तमेव – *'यो ज्योतिषं वेद नरश्च सम्यग् धर्मार्थमोक्षं लभते यशश्च'* (आचार्य, सन् २०११, पृ. ३६) इति। एतन्न कथनमेव लोके प्रत्यक्षेण तदनुभूयते। शास्त्रान्तरज्ञानापेक्षया दैवज्ञाः धनिनो यशस्विनश्च जायन्ते। *'न हि कस्तुरिकामोदः सपथेन विभाव्यते।'* (संस्कृतसूक्तिः)। इतिवद् न तत्र प्रमाणान्वेषणापेक्षा। ज्योतिषशास्त्रं मूलतो हितोपदेशकं शास्त्रमस्ति। अतीतानागतवर्तमानकालिकं निखिलमपि विषयजातं हस्तामलकवत् प्रदर्श्य अतीतवृत्तान्तात् सत्शिक्षां दापयति, अनागतवृत्तान्तात् सावधानं विधास्यति, वर्तमाने च सन्मार्गं सूचयति। शास्त्रमिदं न केवलं विपत्तिं सङ्केतयति, अपितु

ततो निवृत्तिमार्गमपि प्रदर्शयति । चिकित्सापद्धतौ एका ग्रहचिकित्सापद्धतिरपि ज्योतिषशास्त्रे प्रतिपादिता विद्यते । अष्टाङ्गचिकित्सापद्धतिषु इयं पद्धतिः बहुमहत्त्वपूर्णा मन्यते । यत्र अन्यचिकित्सापद्धतीनां न गतिः, तत्र ग्रहचिकित्सापद्धतेः अव्याहता गतिः दृश्यते । अनया पद्धत्या असाध्यरोगस्यापि निवारणं दृश्यतेऽनुभूयते च कदाचित् । अतः ज्योतिषशास्त्रं बहूपयोगि शास्त्रं विद्यते । प्राचीनैर्ऋषिभिः महर्षिभिश्च प्रतिपादितः ज्योतिषसिद्धान्तः सार्वकालिकः सार्वदेशिकः सार्ववर्णिकश्चामरः सिद्धान्तोऽस्ति । यस्याश्रयेण सर्वे दुःखशोकरोगभयादिकष्टं सोपायं सुखेन निवारयन्ति ।

## शुभाशुभशकुनविवेचनम्

ज्योतिषशास्त्रस्यानेके भेदाः सन्ति । सिद्धान्तसंहिताहोराख्येषु त्रिषु स्कन्धेषु बहवो विषयाः सन्निविष्टाः दृश्यन्ते । *'ज्योतिःशास्त्रमनेकभेदविषयम्'* (वराहमिहिरः, २०६९, पृ.५) । इत्याद्युक्त्यापि शास्त्रस्यास्य बहुशाखत्वमवगम्यते । ग्रहविचारशास्त्रं वास्तुशास्त्रं मुहूर्तशास्त्रं सामुद्रिकशास्त्रम्, इत्यादीनि बहूनि शास्त्राणि ज्योतिषशास्त्रान्तर्गतान्येव सन्ति । तेष्वेकं शकुनशास्त्रमपि महत्त्वपूर्णं विद्यते । शास्त्रमिदं संहितास्कन्धान्तर्गतं विद्यते । शकुनशास्त्रस्यापि भेदद्वयमवलोक्यते । तत्र ग्रहनक्षत्रराशिलग्नादिचक्रमाधृत्य फलितज्योतिसम्बद्धं शकुनशास्त्रमेकं, बाह्यपदार्थदर्शनानुसारं शुभशुभपरिणामप्रकटनपरं शकुनशास्त्रं चापरम् । प्रकारान्तरेण तु शकुनं बहुविधं विद्यते । पशुपक्षिणां शब्दचेष्टादिसम्बद्धं स्वप्नसम्बद्धम्, अङ्गस्फुरणसम्बद्धं विशेषाङ्गकण्डूतिसम्बद्धं वृष्टिसम्बद्धम् अन्तरिक्षाकृतिसम्बद्धं वनस्पतीनां परिवृत्तिसम्बद्धं देवप्रतिमासम्बद्धं मृत्पाषाणादिसम्बद्धं केनचिज्जीवेन सह स्पर्शसम्बद्धं यात्रागमनागमनयोः प्रसङ्गे छित्कारजृम्भणादिसम्बद्धम्, इत्यादीनि बहुविधानि शकुनानि व्यावहारेऽनुभूयन्ते । वनस्पति-पश-पक्षि-कीटादि-प्राकृतिकवस्तुजातेभ्यो वयमिष्टानिष्टबोधकं शुभाशुभशकुनं ज्ञातुं शक्नुमः । परं तत्सम्बद्धविज्ञानं ज्ञेयं पूर्वम् । सामान्यतयोद्यन्तमादित्यं वीक्ष्य यदा सारमेया रुदन्ति, शृगालाः दिवसेऽपि क्रोशन्ति, रात्रौ बिडालाः निष्कारणं रुवन्ति, तदा कोऽप्यनिष्टमाशङ्क्यते । कदाचिद्यात्रासमये यदि कृकलास-सर्प-बिडालादिजन्तवः मार्गावरोधं कुर्वन्ति अथवा पार्श्वतः समुल्लङ्घ्य गच्छन्ति तदापि स्वाभीष्टविषये विपत्तिः सम्भाव्यते । वन्याः पशुपक्षिणः विशेषज्ञानरहिताः भवन्तीति वयं वदामः, परन्तु न तथा तेऽपि विशेषदृष्ट्या शकुनज्ञाः भवन्ति । मृगादिपशवोऽपि क्रूरकर्माणं मनुष्यं दृष्ट्वा भयमाशङ्कन्ते चेत् साधुपुरुषं दृष्ट्वा स्वतो निर्भयाः जायन्ते । पाशशरासनादिकमगृह्णतोऽपि व्याधान् विलोक्य पक्षिणोऽयं हिंसकः, इति दूरादेव पलायन्ते । परन्तु पाशपाणिमपि सज्जनं दृष्ट्वा नैव भीतिङ्गच्छन्ति, सन्निकटमेव प्राप्नुवन्ति । अतस्तेषामपि शकुनज्ञत्वं न विरुध्यते । गावः भूकम्पाद्यनिष्टं पूर्वमेव जानन्ति, टिट्टिभ-कर्कटादयो जन्तवः जलवर्षादिकं तथा तेन जायमानं जलप्रवाहादिकं च प्रागेवावगच्छन्तीति लोकविश्रुतिः विद्यत एव । शास्त्रेषु शकुनसम्बद्धाः बहवः प्रसङ्गाः प्राप्यन्ते । भागवतानुसारम् अर्जुनो यदा भगवता कृष्णेन सह मिलितुं द्वारकां गतः । ततो बहुकालं यावत् स नायातः । भगवतः कृष्णस्य स्वधामगमनस्य समय आसीत्सः । तदैव हस्तिनापुरे युधिष्ठिरोऽशुभशकुनं दृष्ट्वा किमप्यनिष्टमुत्प्रैक्षत । तत्र समुल्लिखितं यत् –दिवि भुवि च अमङ्गलसूचकं दारुणमुत्पातादिकं दृश्यते । मनसि निष्कारणमेव भयमाविष्टमस्ति । खरस्पर्शो वायुर्वाति, सारमेयाः रुवन्ति, दिशः धुम्रायन्ते, जलदाः असृग् वर्षन्ति । अग्निर्न ज्वलति । गावः अश्रुमुखाः रुदन्ति । देवप्रतिमासु स्वेदविन्दवः समायान्ति । हृदि कम्पनं जायते । किन्निमित्तमनिष्टमिदमिति धर्मराजः स्वानुजं भीमं परिपृच्छति । (श्रीमद्भागवत, १/१४/१०-२०) (वेदव्यास, २०७५, पृ. ५४) । सर्वेष्ववशिष्टेषु पाण्डवेषु रीत्यानया विह्वलेषु द्वारकातोऽर्जुनः प्रत्यागच्छत् । ततोऽशुभशकुनस्य सङ्केतरूपं भगवतः श्रीकृष्णस्य स्वधामगमनमबुध्यन्त । कदाचित् शरीरस्य अङ्गस्फुरणादिनापि शुभाशुभशकुनं ज्ञायते । पुरुषाणां

दक्षिणबाहुस्फुरणे दक्षिणनेत्रस्फुरणे च शुभसङ्केतोऽनुमीयते चेत् स्त्रीणां दक्षिणाङ्गस्फुरणमशुभं मन्यते । पुरुषाणां च वामाङ्गस्फुरणं प्रायः विपत्तिजनकं समामनन्ति । पुराणादिषु काव्यनाटकेषु च क्वचित् कथाप्रसङ्गे अङ्गस्फुरणादिशकुनस्योदाहरणं प्राप्यते । अभिज्ञानशाकुन्तले च कण्वमहर्षेराश्रमपदं प्राप्तस्य दुष्यन्तस्य दक्षिणबाहुः परिस्फुरति । दक्षिणबाहुस्फुरणस्य च फलं यूनां रूपवतीकन्याप्राप्तिः कथितं शकुनविद्भिः । परमाश्रमे कथं तत्प्राप्तिः सम्भवतीति राजा स्वयं तत्फलं निवारयति – *'शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य'* (अभिज्ञान.शा. १/१५) (कालिदासः, सन् १०७६, पृ. ४३३) इति । परमस्य शुभशकुनस्य फलं राजा दुष्यन्तः शकुन्तलानाम्नीं कन्यामधिगच्छत्येव । काव्यशास्त्रादिषु एव नापितु लोकव्यवहारेऽपि शकुनं जनाः विश्वसन्ति । काकः शुष्कतरुशाखायां स्थित्वा कूजति चेत्, तस्य कोऽप्येकः अर्थः निष्पद्यते । एवं स एव काकः पुष्पपल्लवादिभरिते हरिते वृक्षे स्थित्वा यदा कूजति पुनस्तस्यापरोऽर्थः निस्कास्यते शकुनज्ञैः । यात्राविषये तु शुभाशुभशकुनं प्रसिद्धमेव । यदा यात्रारम्भसमये बन्ध्यास्त्री, कृष्णवस्त्रम्, अस्थि, भुजङ्गः, लवणम्, कृष्णाङ्गारः, विष्ठा, तैलम्, उन्मत्तपुरुषः, रोगार्तः, दहदृहम्, मिथः कलहः, रिक्तो घटः महिषयोर्द्वन्द्वम्, बिडालस्य मार्गोल्लङ्घनम् इत्यादीनि समायान्ति जायन्ते वा तदा सद्यः एव यात्रा स्थगयितव्या । अशुभशकुने यात्रा नैव कार्या । (मुहूर्तचि., ११/१०२-१०३) (रामाचार्यः, २०५४, पृ. ११५) । एवमेव यात्रायां शुभशकुनानि अपि शास्त्रेषु वर्णितानि सन्ति यथा – यात्रारम्भे ब्राह्मणदर्शनम्, गोहस्तिघोटकदर्शनम्, अन्नफलादिदर्शनम्, तथा दधि, कमलपुष्पम्, श्वेतवस्त्रम्, किमपि श्वेतं वस्तु, वेश्यास्त्री, वाद्यवादनम्, मयूरः, दीपः, शिशुसहिता स्त्री, चम्पकपुष्पम्, कन्या, मङ्गलपाठः, पूर्णो घटः, घृतम्, इक्षुः, वृषभः, वेदध्वनिः, इत्यादीनि च शुभशकुनत्वेन वर्णितानि सन्ति । (मुहूर्तचिन्ता. ११/१००) (रामाचार्यः, २०५४, पृ. ११४), प्रारम्भेणैव परिणामोऽनुमीयते । प्रकृतिः सर्वेषां प्राणिनां निकटवर्तिनी अस्ति । अतः निखिलमपि जायमानं शुभाशुभकार्यजातं प्रकृतिः सूचयति । सा सूचना केवलमस्माभिरवगन्तव्या । दशकुमारचरिताख्ये गद्यकाव्ये पुष्पोद्भवो नाम कुमारः राजवाहननामानं राजकुमारमन्वेष्टुं गच्छति, तेन सह बन्धुपालनाम्नो वणिजो मैत्री जायते । एकदा स्वराजकुमारमन्विषन्तं पुष्पोद्भवं शकुनज्ञो बन्धुपालो ब्रूते *'सकलं धरणितलमपारमन्वेष्टुमक्षमो भवान् । मनोग्लानिं विहाय तूष्णीं तिष्ठतु । भवन्नायकालोकनकारणं शुभशकुनं निरीक्ष्य कथयिष्यामीति ।'* (दशकु. १/४/१०), (दण्डी, २०१५, पृ. ६९) । शकुनज्ञो बन्धुपालो यदा शकुनं दृष्ट्वा ब्रवीति तदा राजबाहनेन साकं पुष्पोद्भवस्य सङ्गमोऽजायत । अतः शकुनशास्त्रस्य चर्चा न केवलं एकत्र अपितु लौकिकवैदिकशास्त्रीयव्यवहारेष्वपि सर्वत्र विद्यते । आधुनिकाः वैज्ञानिकम्मन्याः यद्यपि पूर्णतः न विश्वसियुः तथापि तेषां व्यवहारे शकुनस्य प्रभावः अवश्यं जायते । यया कयापि रीत्या तेऽपि विश्वासवशा भवन्त्येव । शकुनज्ञाः पुरुषाः शकुनं दृष्ट्वा मृत्युमपि निश्चिन्वन्ति । काकमैथुनदर्शनम्, काकगृद्ध्रादीनां मस्तकारोहणम्, इत्यादिशकुनानि मृत्यद्योतकानि भवन्ति । विशेषतः मृत्युशकुनानि चतुर्विधानि प्रतिपादितानि सन्ति । तत्र पशुसङ्केतसम्बद्धम्, मानसिकसङ्केतसम्बद्धम्, स्वप्नसम्बद्धं तथा अङ्गस्फुरणादिलक्षणसम्बद्धञ्च । (ज्योतिषतत्त्वाङ्क, सन् २०१४, पृ. ३९१) । ये पशुपक्षिणः शुभाशुभशकुनं प्रदर्शयन्ति, ते केवलं सूचका एव । न ते कारकाः । अतः बिडालोऽयं मन्मार्गमुल्लङ्घयति । काकोऽयमप्रियं रौति । शृगालोऽयं दिवा एव उच्चैः रोदिति । कृष्णसर्पोऽयं मार्गमवरुणद्धीति विचार्य ते नैव दण्ड्याः । ते तु अस्मान् पूर्वमेव सावधानाय सङ्केतयन्ति । न ते विपत्तिकारिणः तेषां शकुनं विचार्य व्यवहारो विधेयः । सति सम्भवे अपशकुनशान्तिरपि शास्त्रेषु निर्दिष्टास्ति, तदनुष्ठेया । महाभारतरामायणपुराणादिषु एतत्सम्बद्धा शतशः आख्यायिका प्रस्तुता प्राप्यते । *'अद्भुतानिह यावन्ति भूमौ वियति वा जले । त्वयि विश्वात्मके तानि किं मे दृष्टं विपश्यत ॥'* (श्रीमद्भा., १०/४१/४) (वेदव्यास, २०७५, पृ. ४७९) इति ।

ज्योतिषशास्त्रे एतादृशं शुभाशुभशकुनद्योतकं शकुनशास्त्रं बहुमहत्त्वाधायकं दरीदृश्यते। शास्त्रेऽस्मिन् शकुनप्रदर्शनपूर्वकं तन्निवारणपायोऽपि निरूपितोऽस्ति। अतः शास्त्रमिदमनुसन्धेयं विचारणीयं च विद्यते।

## उपसंहारः

ज्योतिषशास्त्रं बहुविपुलं विद्यते । यथा बहुशाखासंयुक्तो वृक्षः विशालो दृश्यते, तथैवास्य शास्त्रस्यापि बहुशाखासंयुक्तत्वात् विशालत्वं निर्बाधम्। विविधशाखाप्रशाखाभिः विस्तृतस्य ज्योतिषवृक्षस्य शकुनसिद्धान्तः एको विभागो विद्यते। अस्मिन् भागे शुभाशुभशकुनसम्बद्धाः विषयाः सूक्ष्मतया विवेचिताः सन्ति। ज्योतिषशास्त्रमित्युक्त्या जनानां मनसि ग्रहविचारशास्त्रं, गणितशास्त्रं वा इत्येव भाति। परन्तु तावदेव तच्छास्त्रम्, इति नैव जानन्ति सर्वे इदं शास्त्रं तु प्राकृतिकशास्त्रं स्वप्नशास्त्रम् अङ्गशास्त्रमित्यादिनाम्नापि बोद्धुं शक्यते। यतो हि तत्तन्माध्यमेन शास्त्रमिदं शुभाशुभं दिशति। प्रकृतिप्रदत्तं सङ्केतमनुसन्धाय शास्त्रेणानेन प्रागेव परिणामावबोधो जायते। कस्मिन् समये दृष्टं स्वप्नं किं किं फलं प्रसूते इत्यादिकमपि अस्याश्रयेण ज्ञातुं शक्यते। वस्तुतः शकुनशास्त्रं विश्वासाधीनमस्ति। आधुनिकाः सप्रमाणं तथ्यं विश्वसन्ति । ते शकुनादिकं स्वीकर्तुं नेच्छन्ति । परन्तु शकुनसिद्धान्तः प्राचीनोऽस्ति । महाभारतादियुद्धेष्वपि तत्पूर्वमशुभशकुनं लोकैः अनुभूतमासीत्। द्वितीयविश्वयुद्धस्य पूर्वमपि आकाशात् रुधिरवृष्टिर्जातेति वृद्धानामनुभवो विद्यते। वैज्ञानिकैः तद्रक्तं परीक्षणाय गृहीतं परन्तु कस्य रक्तमिति ज्ञातुं ते नाशक्नुवन्। रक्तमस्ति परं कस्येति न ज्ञायते। प्रकृतिः विलक्षणास्ति। तां वशीकर्तुं स्वोहापोहं ज्ञातुं च केऽपि न शक्नुवन्ति। स्वात्मानं वैज्ञानिकम्मन्याः जना अपि प्रकृतेः पुरतो निरीहाः जायन्ते। अतः प्रकृतिः प्राणिनां हितकारिणी अस्ति। सा प्राणिनामनिष्टं पूर्वमेव सङ्केतयति। प्रकृतिसूचितं शकुनं स्वीकृत्य कार्यं कुर्वाणो न कदापि वैफल्यं भजते। तस्मादेव शास्त्रेषूक्तम् – गर्गाचार्यः प्रातःकालं प्रशंसति । बृहस्पतिश्च शकुनं प्रशंसति । महर्षिरङ्गिराः उत्साहं प्रशंसति चेत्, भगवान् नारायणश्च ब्राह्मणवचनं च प्रशंसति इति। कथनस्य तात्पर्यमस्ति यत् गर्गानुसारं प्रातःकाले ब्राह्मे मुहूर्ते वा कार्यारम्भः क्रियते चेत् कार्यं निर्विघ्नं सिद्ध्यति । तत्र बृहस्पतिश्च शकुनं दृष्ट्वा एव कार्यारम्भो विधेयः इति मतं प्रस्तौति । अङ्गिरसो मते यदि मनसि उत्साहश्चेत् कार्ये न कोऽपि विघ्न इति। तथा भगवान्नारायणश्च ब्राह्मणवचनानुसारं यात्राकार्यादिकं विधेयं, तथा सति न कोऽप्यन्तराय इति। अनया रीत्या आचार्यैः स्वं स्वं मतं प्रकटितम्। ज्योतिषशास्त्रान्तर्गतं शकुनशास्त्रं नैकविधम्। देश-काल-वातावरणानुसारं शकुनमपि पृथक् पृथक् परिणामं सूचयति। छित्कारः सामान्यतया अशुभद्योतकः, अशुभबोधकः अङ्गीकृतः। परन्तु अध्ययनादौ तस्य शुभकारित्वं शकुनविद्भिः व्याख्यातम्। '*.....औषधसेवने अध्ययने बीजवापे येषु शुभा*' (ज्योतिषतत्त्वाङ्कः, सन् २०१४, पृ. ३९५) इति। कस्यचित्कार्यस्य अवश्यकर्तव्यत्वे सत्यपि अशुभशकुने उपायं प्रकल्प्य विधातुं शक्यते। शास्त्रेषु अशुभनिवारणविधानं निर्दितमस्ति। तेन मनसि विश्रम्भो जायते। कस्यचिन्मन्त्रस्य जपः, कस्यचिद्देवस्य स्मरणम्, पाठादिकम्, किमपि अनुष्ठानं वा प्रतिकारविधानम् तत्तच्छास्त्रेषु प्रतिपादितमस्ति। अतः शकुनं विचार्यैव कार्यारम्भो विधेयः तेन क्वचिदपि वैफल्यं न फलतीति।

## कृतज्ञताज्ञापनम्

लेखस्यास्य प्राविधिकदृष्ट्या विषयप्रतिपादनदृष्ट्या च परीक्षणं विधाय सम्पादनाय परिष्काराय च महदुपकारं कृतवद्भ्यः सर्वेभ्यो विशेषज्ञगुरुभ्योऽन्येभ्यः सहयोगिभ्यश्च हार्दं कार्तज्ञ्यं व्यनज्मि।

## सन्दर्भग्रन्थाः

अधिकारी, विक्रम (२०७६), *पाणिनीय शिक्षा एवम् लिङ्गानुशासनम्*, देवघाट : विक्रम अधिकारी।
आचार्य, भास्कर (सन् २०११), *सिद्धान्तशिरोमणि*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
आचार्य, शङ्कर (२०५०), *गीताभाष्यम्*, गोरखपुर : गीताप्रेस।
आप्टे, वामन शिवराम (२०१०), *संस्कृतहिन्दीशब्दकोशः*, दिल्ली : कमलप्रकाशन।
कालिदासः, (सन् १९७६), *कालिदासग्रन्थावली*, वाराणसी : काशीहिन्दूविश्वविद्यालयः।
गिरि, रामानन्द (२०७३), *ईशादि दश उपनिषद्*, देवघाट : महेशसंस्कृतगुरुकुलम्।
*ज्योतिषतत्त्वाङ्कः*, (२०१४), गोरखपुर : गीताप्रेस।
दण्डि, (२०१५), *दशकुमारचरितम्*, वाराणसी : चौखम्बासंस्कृतसिरीज।
दाहाल, लोकमणि (१९९०), *ज्योतिषशास्त्रस्येतिहासः*, वाराणसी : चौखम्बा सुरभारती प्रकाशन।
महर्षि, याज्ञवल्क्य (१९०९), *याज्ञवल्क्यस्मृतिः*, मुम्बई : निर्णय सागर प्रेस।
महर्षिवाल्मीकिः, (२०४०) *वाल्मीकिरामायणम्*, गोरखपुर : गीताप्रेस।
मिश्र, रामचन्द्र (२०३६), *संस्कृतसाहित्येतिहासः*, वाराणसी : चौखम्बा संस्कृत संस्थान।
मिश्र, रामप्रसाद (१९८०), *चाणक्यनीतिदर्पण*, वाराणसी : चौखम्बा संस्कृत संस्थान।
रामाचार्यः, (२०५४) *मुहूर्तचिन्तामणिः*, मुम्बई : खेमराज श्रीकृष्णदास।
वराहमिहिर (१८८२), *लघुजातकम्*, वाराणसी : ठाकुरप्रसाद पुस्तक मन्दिर।
वराहमिहिर (२०१३), *बृहज्जातकम्*, (श्रीमद् अच्युतानन्द झा व्या.), बनारस : चौखम्बा संस्कृत सिरिज।
वराहमिहिर (२०६९), *बृहत्संहिता*, (द्वि.सं.), (डा. सुरकान्त झा सम्पा.), वाराणसी : चौखम्बा संस्कृत सिरिज।
वेदव्यास (२०६९), *श्रीमद्भगवद्गीता*, गोरखपुर : गीताप्रेस।
वेदव्यास. (२०७५). *श्रीमद्भागवतमहापुराणम्* (स्थूलाक्षरं मूलमात्रम्). गोरखपुर: गीताप्रेस.
शर्मा, पं वसतिराम (१९६३), *नारदसंहिता*, मुम्बई : खेमराज श्रीकृष्णदास।
शर्मा, प्राणनाथ (सम्पा.), (१९४०), *मनुस्मृति*, वाराणसी : चौखम्बा संस्कृत भवन।
शर्मा, विश्वनाथ (१९८६), *हितोपदेशः*, वाराणसी : मोतीलाल बनारसी दास।
शास्त्री, चारुदेव (२०२५), *व्याकरणमहाभाष्यम्*, दिल्ली : मोतीलाल बनारसीदास।
शास्त्री, श्रीरामकृष्णजी (२०७३), *अन्त्यकर्मश्राद्धप्रकाश*, गोरखपुर : गीताप्रेस।